# संस्कृत-वार्ताः

**दिनाङ्क :- 31.05.2025**

**सायम् :- 06:20**

**अनुवादकौ - पुनीतललितौ**

**प्रवाचकः - ललितमोहनः तिवारी**

**आशुलिपिका - मीनाक्षी**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**प्रवाचकः – ललितमोहनः तिवारी**

# आदौ-मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् पहलगाम आतंकी आक्रमणम् भारतस्य नारी शक्तीनां कृते समाह्वानं आसीत्, सममेव आक्रमणस्य व्यूह रचयेतृणां कृते मृत्योः संदेशं एव वर्तते ।
- प्रधानमन्त्रिणा उक्तं यत् तस्य प्रशासनं महिलानेतृत्वे विकासं शासनस्य मुख्यबिन्दुरूपेण निर्माति।
- कोलम्बियादेशेन आधिकारिकतया स्वस्य वक्तव्यं प्रत्यावर्तितं यत् सिन्दूराभियानावधौ भारतीय-प्रहारेण पाकिस्ताने प्राणहानिविषये शोक-संवेदना प्रकटितमासीत्।
- विदेशसचिवः विक्रममिसरी इत्यनेन वाशिङ्गटन-नगरस्य यात्रावधौ अमेरिकीय प्रशासनस्य वरिष्ठाधिकारिभिः सह उच्चस्तरीयोपवेशनं कृतम्।
- **अपि च**

  फ्रेंच ओपन पुरुषयुगलक्रीडायां अद्य पेरिस्-नगरे भारतस्य युकी भांबरी तस्य अमेरिकीय सहभागी रोबर्ट् गैलोवे च निकोला मेक्टिक्, माइकल वीनस् इत्युभौ पराजित्य तृतीय-परिक्रमे प्रविष्टवान्।

## अथ वार्ताः विस्तरेण

### प्रधानमन्त्री मध्य प्रदेश

प्रधानमंत्री नरेन्द्र मोदी अद्य भोपालस्य जम्बूरी प्रांगणे लोकमाता देवी अहिल्याबाई इत्यस्याः त्रिंशततम्याः जयन्त्याः अवसरे आयोजिते महिला सशक्तीकरण सम्मेलनं सम्बोधितवान्। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् पहलगाम आतंकी आक्रमणम् भारतस्य नारी शक्तीनां कृते समाह्वानं आसीत् सममेव आक्रमणस्य व्यूह रचयेतृणां कृते मृत्योः संदेशं एव वर्तते। असौ प्रोक्तवान् यत् भारतं कश्चिदपि परोक्ष युद्धं अक्षम्यरूपेण द्रक्ष्यति।

**बाइट – पहलगाम ------से.**

प्रशासनस्य जनकल्याण योजनानां उल्लेखयता सः अवदत् यत् अस्माकं प्रशासनम् लोकमाता अहिल्याबाई देव्याःनागरिक देवो भवः इति मंत्रमालक्ष्य कार्यं करोति । अस्माकं प्रशासनम् महिला नेतृत्वे विकासस्य दृष्टिकोणं मुख्याधारात्वेन निर्माति । प्रशासनस्य प्रत्येक महत् योजनासु महिलानां महत्वपूर्णा भूमिका अस्ति।

**बाइट – पीएम ऑन वुमेन एलईडी गवर्नमेंट - से.**

अस्मिन् कार्यक्रमे श्रीमोदिना षष्ठिकोटिरूप्यकाणां व्ययेन चतुर्विंशत्यधिकैकशत एकरपरिमितेसु नवनिर्मितस्य दतियाविमानस्थानकस्य, प्रायः सप्तत्रिंशत्कोटिरूप्यकाणां व्ययेन नवनिर्मितस्य सतनाविमानस्थानकस्य च उद्घाटनं कृतम्। सः इन्दौरनगरे मेट्रो-रेलयानस्य प्रथमचरणस्य उद्घाटनम् अपि अकरोत् । तेन एकसप्तत्यधिक द्विशतोत्तरैक सहस्रं अटलग्रामसेवा सदनस्य निर्माणार्थं प्रथम देयमुल्यस्य अपि विमोचनं कृतम् । अटल ग्राम सुशासन भवनानां निर्माणेन ग्राम पंचायतानां स्थायीभवनस्य सुविधा प्रदानं भविष्यति ।

**बहुदलीयप्रतिनिधिमण्डलम् -**

कोलम्बियादेशेन आधिकारिकतया स्वस्य वक्तव्यं प्रत्यावर्तितं यत् सिन्दूराभियानावधौ भारतीय-प्रहारेण पाकिस्ताने प्राणहानिविषये शोक-संवेदना प्रकटितसीत्। एतत् वक्तव्यं काङ्ग्रेस-दलस्य सांसदः शशि-थरूरस्य नेतृत्वे सर्वदलीय-प्रतिनिधिमण्डलस्य कोलम्बिया-देशस्य विदेश-उपमन्त्री रोजा योलाण्डा-विलाविसेन्सिओ-इत्यनेन सह मेलनानन्तरम् आगच्छत। कोलम्बियादेशस्य मन्त्रिभ्यः वरिष्ठाधिकारिभ्यः च ज्ञापयन् काङ्ग्रेसदलस्य सांसदः शशि थरूरस्य नेतृत्वे बहुदलीयप्रतिनिधिमण्डलेन घटनायाः विषये भारतस्य दृष्टिकोणं प्रकटितम्, कोलम्बियादेशस्य वक्तव्ये निराशा च प्रकटिता।

**बाइट- शशि थारूर-प्रतिनिधित्व - ... से.**

तत्रैव शिवसेना-सांसदः डॉ.श्रीकान्त-एकनाथ-शिण्दे इत्यस्य नेतृत्वे प्रतिनिधिमण्डलस्य सियरा-लियोन्-देशस्य यात्रायाः समापनम् अभवत्।

## विरामः

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

## भारतीय स्टेट बैंक

भारतीय स्टेट बैंक (एसबीआई) इत्यस्यानुसारं वित्तीय-वर्षे षडविंशत्यधिकद्विशतसहस्र-तमे वर्षे भारतस्य सकलगृहोत्पादः षड दशमलवाधिक पञ्च प्रतिशतमितं भवितुमर्हति। यस्मिन् चतुर्थे त्रैमासिके सप्त दशमलव चतुः प्रतिशतमितेः वृद्धेः समर्थनं प्राप्तमस्ति। इमां वृद्धिं त्रैमासिकावधौ वित्तीय निवेशे नव दशमलवाधिक चतुः प्रतिशतमितेः वृद्ध्या सहायता प्राप्ता। अस्मिन् वर्षे वित्तीय निर्माणे सप्त दशमलवाधिक एक प्रतिशतमितेः वृद्धिः सञ्जाता।

## मिस्री - अमेरिकायात्रा

विदेशसचिवः विक्रममिसरी इत्यनेन वाशिङ्गटन-नगरस्य यात्रावधौ अमेरिकीप्रशासनस्य वरिष्ठाधिकारिभिः सह उच्चस्तरीयोपवेशनं कृतम्। स्वभ्रमणावधौ विदेशसचिवः श्रीमिसरी अमेरिकीविदेशसचिवेन क्रिस्टोफर लैण्डो इत्यनेन सह मिलितवान् यस्मिन् उभौपक्षौ द्विपक्षीयकार्यक्रमाणां समीक्षितवन्तौ। उभौ बलं प्रदत्तवन्तौ यत् प्रौद्योगिकी, व्यापारः, प्रतिभा च एकविंशतितमे शतके भारतामेरिका-सहभागिता निर्माणस्य प्रमुखाः स्तम्भाः भविष्यन्ति। कोषस्य उपसचिवः माइकल फॉल्केण्डर् इत्यनेन सह विदेशसचिवः आर्थिकवित्तीयसम्बन्धानां दृढीकरणस्य उपायानां विषये चर्चां कृतवान्, यत्र अन्तर्राष्ट्रीयवित्तीयसंस्थासु सहकार्यं, आगामिषु वित्तीयकार्याणि कार्यदलप्रक्रियासु समन्वयः चास्ति। सः अमेरिकी-वाणिज्यस्य उपसचिवः जेफ्री केस्लर इत्यनेन सह भारतामेरिका-द्विपक्षीयव्यापारप्रगतेः समीक्षां कृतवान् । सः उद्योगप्रतिनिधिभिः सह महत्त्वपूर्णेषु उदयमानेषु च प्रौद्योगिकीसु द्विपक्षीयसहकार्यं इतोपि सुदृढं कर्तुं उपवेशनम् कृतवान्।

## मिजोरम - भूकम्पः

मिजोरम-राज्ये लॉङ्गटलै-नगरे प्रचण्डवृष्ट्या कारणेन भूस्खलनस्यानन्तरं वसतिगृहं समेत षट् गृहाणां पतनेन अनेके जनाः मृताः इत्याशङ्का वर्तते। अधिकारिणः प्रोक्तवन्तः यत् शुक्रवासरे रात्रौ प्रायः सार्धदश वादने बाजारवेङ्ग-चान्दमारी-क्षेत्रयोः एषा घटना अभवत् । राज्यापत्प्रतिक्रियाबलस्य (SDRF) इत्येतस्य नेतृत्वे तृतीयभारतीय आरक्षितबटालियन इत्यस्य च कर्मचारिभिः, मण्डलस्य बृहत्तमस्य नागरिकसमाजसमूहस्य यंग लाई एसोसिएशन इत्यस्य स्वयंसेवकानां साहाय्येन उद्धारकार्यक्रमाः प्रचलन्ति। अधुनापि अधिकविवरणं प्रतीक्षते।

## फिट इंडिया

फिट इंडिया संडे ऑन साइकिल इति पदसञ्चलनस्य पञ्च-विंशतितमं संस्करणं श्वः सम्पूर्णे देशे एकविशेष-त्रिरंग जनसभा रूपेण आमानयिष्यते। केंद्रीय युव प्रकर-क्रीडामंत्री डॉ. मनसुख मांडविया राष्ट्रिय राजधान्यां नवदिल्ल्याम् अस्य विशेष संस्करणस्य नेतृत्वं करिष्यति। अस्मिन् कार्यक्रमे ओलंपिक पदक विजेता योगेश्वर दत्तः, अंतरराष्ट्रीय मल्लयुद्ध क्रीडिका सरितामोरः चलचित्र

अभिनेता शारवरी पूर्व क्रिकेट क्रीडकः चयनकर्ता च सबा करीमः चेत्येनं समेत्य अन्ये गणमान्य जनाः भाग ग्रहणं करिष्यन्ति।

**महाराष्ट्रस्य - अहिल्यादेवी**

महाराष्ट्रस्य राज्यपालः सीपी राधाकृष्णनः अद्य मुम्बईनगरस्थे राजभवने अहिल्यादेवी होल्कर इत्यस्याः त्रिंशततम्याः जयन्त्यावसरे तस्यै पुष्पांजलिं समार्पयत्। मुख्यमन्त्री देवेन्द्रः फड़नवीसः अपि नागपुरे तां प्रति श्रद्धा कुसुमांजलिं अयच्छत् । लोकमाता देवी अहिल्याबाई होल्करः मराठा-साम्राज्यस्य शक्तिशालिनी प्रभावशालिनी च शासिका आसीत्।

**जम्मू-कश्मीर-चेरी कार्गो ट्रेनः**

जम्मू कश्मीरे भारतीय रेल मंत्रालयः बागवानी विभाग इत्यनयोः तत्वावधाने अद्य कटरा रेल स्थानकात् मुंबई रेल स्थानकं यावत् चेरी कार्गो इत्यस्य प्रथम-यातायात-सौविध्यस्य आरम्भो जातः। अस्माकं वार्ताहरेण प्रतिपादितं यत् एतत् जम्मू-कश्मीरस्य बागवानी क्षेत्रं संवर्धयितुं प्रमुखैः आपणैः सह संपर्कं संवर्धयितुं च एको महत्त्वपूर्ण-पदक्षेपो वर्तते। अस्य पदक्षेपस्य उद्देश्यं स्थानीय बागवानी क्षेत्रं एकं विश्वसनीयं कुशलं संसाधन-प्रदानं कृत्वा तेषां समर्थनं अस्ति।

**फ्रेंच ओपनः**

फ्रेंच ओपन पुरुषयुगलक्रीडायां अद्य पेरिस्-नगरे भारतस्य युकी भामबरी तस्य अमेरिकीय सहभागी रोबर्ट् गैलोवे च निकोला मेक्टिक्, माइकल वीनस् इत्युभौ पराजित्य तृतीय-परिक्रमे प्रविष्टवान्।

**।। इति वार्ताः ।।**